Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 18

No. of Printed Pages – 11

**SS–12–Sanskrit Sah.(Supp.)**

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

# उच्च माध्यमिक पूरक परीक्षा, 2025

## SENIOR SECONDARY SUPPLEMENTARY EXAMINATION, 2025

## संस्कृतसाहित्यम्

**समय : 3:15 (सपाद त्रिवादनम्)**

**पूर्णाङ्कः** : 80

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) **परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांकः अनिवार्यतः लेख्यः ।**

2) **सर्वे प्रश्नाः अनिवार्याः ।**

3) **प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।**

4) **प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।**

यहाँ से काटिए

## खण्डः – 'अ'

1) बहुविकल्पात्मक प्रश्ना :– [10 × 1 = 10]

i) मृत्युं तीर्त्वा विद्ययाकिम् अश्नुते? [1]

अ) सत्यम्

ब) धनम्

स) अमृतम्

द) सम्मानम्

ii) ''बाल कौतुकम्'' इति पाठानुसारेण ''नुनमाश्वमेधि कोऽयमश्वः'' इति कथनं केन कथितम्? [1]

अ) लवेन

ब) बटवेन

स) अरून्धत्या

द) कौसल्यया

iii) ''कर्मगौरवम्'' पाठानुसारेण सुकृतदुष्कृते उभे कः जहाति? [1]

अ) बुद्धियुक्तः

ब) धनयुक्तः

स) धर्मयुक्तः

द) कर्मयुक्तः

iv) ''शुकनासोपदेशः'' इति पाठानुसारेण राज्य सुख सन्निपात निद्रा कीदृशी भवति? [1]

अ) दारूणा

ब) सार्थका

स) धोरा

द) निरर्थका

v) ''विक्रमस्यौदार्यम्'' पाठानुसारेण उपार्जितानां वित्तानां कः एव हि रक्षणम्? [1]

अ) योगः

ब) त्यागः

स) भोगः

द) नाशः

vi) ''कार्यं वा साधयेयम्, देहं वा पातयेयम्'' पाठानुसारेण कृत प्रति ज्ञोऽसौ क: य: निजकार्यन्नि विरमति? [1]

अ) वीरशिव:

ब) देवज्ञ:

स) धनुर्ज्ञ:

द) शिव वीरचर:

vii) ''सूक्तिसुधा'' पाठानुसारेण सततं भूषणं किम्? [1]

अ) सुवर्णभूषणम्

ब) वाग्भूषणम्

स) रजतभूषणम्

द) कुसुमभूषणम्

viii) ''स्नुषा'' इति शब्दस्य कोऽर्थ:? [1]

अ) माता

ब) भगिनी

स) पुत्रवधू:

द) पुत्री

ix) तेजोद्वयस्य युगपद् व्यसनोदयाभ्याम्। वाक्येऽस्मिन् किं छन्द:? [1]

अ) वंशस्थ

ब) उपजाति

स) वसन्ततिलका

द) मालिनी

x) ''वर्णसाम्यम्'' इति कस्मिन् अलङ्कारे भवति? [1]

अ) यमकम्

ब) अनुप्रास:

स) श्लेष:

द) रूपकम्

**2)** रिक्तस्थानानि पूरयत – (प्रकृति – प्रत्ययौ योजयित्वा यथा निर्देशं लिखत) **[4 × 1 = 4]**

i) अमृता पत्युः पत्रं ………… प्रसन्ना भवति । (दृश् + क्त्वा) **[1]**

ii) त्वया प्रतिदिनं गृहकार्यं …………. । (कृ + अनीयर) **[1]**

iii) राजमार्गेऽपि ……….. गच्छति । (जन + तल्) **[1]**

iv) सा ……… सरोवरं परितः भ्रमति । (अश्व + टाप्) **[1]**

**3)** अतिलघूत्तरात्मक प्रश्नाः – **[10 × 1 = 10]**

i) वेदार्थ विचाराय किं शास्त्रं प्रवृत्तम्? **[1]**

ii) वेदस्य कति अङ्गानि भवन्ति? **[1]**

iii) उत्तर रामचरितनाटकस्य कः लेखकः? **[1]**

iv) पुराणानि कति सन्ति? **[1]**

v) महाकविबाणभट्टेन का कथा लिखिता? **[1]**

vi) संस्कृत साहित्यस्य आधुनिकः प्रथमः उपन्यासः कः? **[1]**

vii) ''पं. गुलाबचन्द्रचूलेट महोदयः'' केन पुरस्कारेण विभूषितः? **[1]**

viii) ''जयपुर विलासः'' इति खण्ड काव्यं केन लिखितम्? **[1]**

ix) ''जीवनस्य पृष्ठद्वयम्'' उपन्यासः केन विरचितः? **[1]**

x) का बहुचर्चिता कथा (कहानी) डॉ. पुष्करदत्तशर्मणा लिखिता? **[1]**

**4)** अधोलिखितश्लोकांशस्य अलङ्कार लक्षणं लिखत – **[1]**

उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः

## खण्डः – 'ब'

5) अधोलिखितयोः छन्दसोः एकस्य छन्दसः लक्षणोदाहरणे लिखत – [2]

क) अनुष्टुम्

ख) शिखरिणी

6) अधोलिखित श्लोकांशयोः एकस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत । [2]

क) सति च कुल विरोधे नामराध्यन्ति बालाः ।

ख) पश्चात्पुच्छं वहति विपुलं तच्च धूनोंत्यजस्रम् ।

7) अधोलिखित श्लोकांशयोः एकस्य हिन्दी भाषायां सप्रसङ्गं भावार्थं लिखत । [2]

क) दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्त्तव्यः ।

ख) सयत्प्रमाणं कुरूते लोक स्तदनुवर्तते ।

8) अधोलिखित श्लोकस्य अन्वयं लिखत । [2]

अस्ति यद्यपि सर्वत्र नीरं नीरज राजितम् ।
रमते न मरालस्य मानसं मानसं विना ।।

9) अधोलिखित पदानां सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत [2 + 2 = 4]

क) इत्यत्र

ख) हरिं वन्दे

10) अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि यथानिर्देशं लिखत– [8]

अस्माकं राष्ट्रम् ऋतु प्रधानं राष्ट्रमस्ति । अत्र हि वर्षे षड् ऋतवः भवन्ति । प्रत्येक ऋतुः द्वयोः मासयोः भवति । चैत्र वैशाखयोः वसन्तः ज्येष्ठ – आषाढयोः ग्रीष्मः, श्रावण भाद्रपदयोः वर्षा, आश्विन कार्तिकयोः शरद्, मार्गशीर्ष पौषयोः हेमन्तः, माघ फाल्गुनयोः शिशिरं चेति । सर्वेषु ऋतुषु वसन्तः सर्वोत्कृष्टः विद्यते । अंतः अयं ऋतुराजः कथ्यते । अयं ऋतुः समस्त – ऋतुभ्यः सुन्दरः अद्भुतः आकर्षकः मनोहरश्च वर्तते ।

क) एकपदेन उत्तरत– [1]

वर्षे कति ऋतवः भवन्ति

ख) पूर्णवाक्येन उत्तरत – [2 + 2 = 4]

i) चैत्र – वैशाखयोः कः ऋतुः भवति?

ii) केषु ऋतुषु वसन्तः सर्वोत्कृष्टः विद्यते

ग) भाषा–सम्बद्धकार्यम् – [1 + 1 = 2]

i) अतः अयम् ऋतुराजः कथ्यते'' इत्यत्रक्रियापदं लिखत ।

ii) ''अस्माकं राष्ट्रम् ऋतुप्रधानम् अस्ति''। इत्यत्र विशेष्य – पदं किम्?

घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । [1]

## खण्डः – 'स'

**11)** अधोलिखितं पठित गद्यांशं पठित्वा प्रश्नानामुत्तराणि यथानिर्देशं लिखत – **[5]**

पुनरपि राजा सिंहासने समुपवेष्टुं गच्छति। ततोऽन्या पुत्तलिका समवदत् ''भो राजन्, एतासिंहासने तेनैव अध्यासितव्यं यस्य विक्रम तुल्यम् औदार्यमस्ति।'' भोजेनोक्तम् ''भो पुत्तलिके, कथय तस्योदार्यम्'' सा वदति, राजन् यस्तु अर्थिनां पूरयति, तस्थिप्सितं देवः सम्पादयति।

क) एकपदेन उत्तरत– **[1]**

राजा सिंहासने किमर्थं गच्छति?

ख) पूर्णवाक्येन उत्तरत– **[2]**

सिंहासनं केन अध्यासितव्यम्?

ग) भाषासम्बद्धकार्यम्– **[1]**

i) ''ततोऽन्या पुत्तलिका समवदत्''। इत्यत्र विशेष्य पदं किम्?

अ) समवदत् ब) पुत्तलिका

स) अन्या द) ततः

ii) ''राजन् ! यस्त्वर्थिनां पूरयति'' इत्यत्र कर्तृपदम् किमस्ति? **[1]**

अ) यः ब) अर्थिनाम्

स) राजन् द) पूरयति

अथवा

एकस्मिन् दिने श्री नायारः पत्रमेकं धृत्वा मस्तकमव नमय्य पढन् आसीत्। नेत्रतीराद् विगलिता अश्रुधारा आर्द्रीकरोति स्म पत्रस्य अर्धाधिकं भागम्। तदानीमेव तस्य कार्यलय लिपिकः श्रीदासः प्रविशति। श्री नायारः तमुक्तवान् अधुना मम गमनसमयः समुपागत एव।

क) एकपदेन उत्तरत–

श्रीनायारस्य कार्यालय लिपिकः कः? **[1]**

ख) पूर्णवाक्येन उत्तरत–

पत्रस्य अर्धाधिकं भाग का आर्द्री करोति? **[2]**

ग) भाषासम्बद्धकार्यम्–

i) ''अधुना मम गमन – समय: समुपागत एव'' इत्यत्र कर्तृपदं किम्? [1]

अ) मम ब) अधुना

स) समुपात्रत: द) गमनसमय:

ii) ''श्रीनायार: पत्रमेकं धृत्वा मस्तकमवनमय्य पठन् आसीत्'' इत्यत्र क्रियापदं किम्? [1]

अ) पत्रम् ब) आसीत्

स) धृत्वा द) श्रीनायार:

12) अधोलिखितं पद्यांशं पठित्वा प्रश्नानामुत्तराणि यथानिर्देशं लिखत – [5]

न बुद्धिभेदं जनयेदज्ञानां कर्म सङ्गि नाम् ।

जोष येत्सर्व कर्माणि विद्वान्युक्त: समाचरन्?

क) एकपदेन उत्तरत– [1]

सर्वकर्माणि क: विद्वान् समाचरन् जोषयेत्?

ख) पूर्णवाक्येन उत्तरत– [2]

विद्वान् केषां बुद्धिभेदं न जनयेत्?

ग) भाषा सम्बद्ध कार्यम् –

i) सर्वकर्माणि विद्वान्युक्त: समाचरन् इत्यत्र विशेष्यपदं किम्? [1]

अ) सर्व ब) कर्माणि

स) विद्वान् द) समाचरन्

ii) ''कर्मसङ्गिनाम् ज्ञानां बुद्धिभेदं न जनयेत्'' इत्यत्र क्रिया पदम् किम्? [1]

अ) बुद्धिभेदम् ब) कर्मसङ्गिनाम्

स) अज्ञानाम् द) जनयेत्

अथवा

विपदि धैर्य मथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रम: ।

यशसि चाभिरूचिर्व्यसनं श्रुतौ प्रकृति सिद्धमिदं हि महात्मनाम् ।।

क) एकपदेन उत्तरत– [1]

महापुरूषाः विपदि किं धारयन्ति?

ख) पूर्णवाक्येन उत्तरत– [2]

इदं हि केषां प्रकृति सिद्धम्?

ग) i) सदसि वाक्–पटुता युधि विक्रम्ः इत्यत्र पराक्रमः इति पदस्य पर्याय – पदम् किम्? [1]

अ) विक्रमः ब) युधि

स) सदासं द) वाक्पटुता

ii) प्रकृतिसिद्ध मिदं हि महात्मनाम् – इत्यत्र सर्वनामपदं किम्? [1]

अ) प्रकृतिः ब) सिद्धम्

स) इदम् द) हि

13) अधोलिखितं नाट्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत। [5]

अरून्धती – अतिजवेन दूर मति क्रान्तः स चपलः कथं दृश्यते? (प्रविश्य)

बटवः – पश्यतु कुमारस्तावदाश्चर्यम्।

लवः – दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः

बटवः – कथं ज्ञायते?

लवः – ननु मूर्खाः। पठित मेव हि युष्माभिरपि तत्काण्डम्। किं न पश्यथ? प्रत्येकं शतसंख्याः कवचिन्ते दण्डि नो निषङ्गिणश्च रक्षितारः। यदि च विप्रत्ययस्तत्पृच्छत।

बटवः – भो भोः! किं प्रयोजनोऽयमश्वः परिवृतः पर्यटति?

क) एकपदेन उत्तरत – [1]

कः परिवृतः पर्यटति?

ख) पूर्णवाक्येन उत्तरत – [2]

ननु मूर्खाः! पठितमेव हि तत्काण्डम्। इति कथनं केन कथितम्?

ग) भाषा सम्बद्ध कार्यम् –

i) पश्यतु कुमारस्तावदाश्चर्यम् इत्यत्र क्रियापदं किम्? [1]

अ) तावत् ब) कुमार:

स) आश्चर्यम् द) पश्यतु

ii) ''नूनमाश्वमेधिकोऽयमश्व: ''इत्यत्र विशेष्यपदं किम्? [1]

अ) नूनम् ब) अश्व:

स) अयम् द) आश्वमेधिक:

अथवा

योगाचार्य: – चित्तवृत्तीनां भेद: लक्षणं चावगच्छन्तु प्रथमं, तत: विस्तरेण बोधयामि ''प्रमाणविपर्यय विकल्प निद्रा स्मृतय:'' इति।

प्रमाणम्: – अर्थात् प्रत्यक्षानुमानागमा: प्रमाणानि।

विपर्यय: – अर्थात् विपर्ययो मिथ्या ज्ञानम तद्रूप प्रतिष्ठितम्।

विकल्प: – अर्थात् शब्दज्ञानानुपाती वस्तु शून्यो विकल्प:।

निद्रा: – अर्थात् अभाव प्रत्यया लम्बना वृत्तिर्निद्रा।

स्मृति: – अर्थात् अनुभूतविषया सम्प्रमोष: स्मृति:।

क) एकपदेन उत्तरत – [1]

प्रत्यक्षानुमानागमा: कानि सन्ति?

ख) पूर्णवाक्येन उत्तरत – [2]

स्मृति: का भवति?

ग) भाषा सम्बद्ध कार्यम् –

i) चित्त वृत्तीनां भेदा: सन्ति– [1]

अ) चत्वार: ब) पञ्च

स) सप्त द) नव

ii) मिथ्याज्ञानमतद्रूपप्रतिष्ठम् [1]

अ) प्रमाणम् ब) निद्रा

स) विकल्प: द) विपर्यय:

14) रेखाङ्कितपदेषु प्रश्ननिर्माणं कुरूत। (केषाञ्चित् त्रयाणाम्) [3×1=3]

क) प्रयत्नवन्तमपि पुरूषं दुर्वि नीता खली करोति।

ख) कर्मणि एव ते अधिकार:।

ग) पादं सुमेरो रिव वज्रभिन्नम्।

घ) ग्रामात् आरात् पंचमी गतवती।

ङ) अधुवा तेन कविता कथिता।

15) अधोलिखितयो: अलंकारयो: कस्यचिद् एकस्य लक्षणम् उदाहरणञ्च लिखत – [3]

क) उत्प्रेक्षा

ख) रूपकम्

## खण्डः – 'द'

**16)** अधोलिखितरेखाङ्कितशब्दान् आधारीकृत्य विभक्तिं तत्कारणञ्च लिखत– (केषाञ्चित् चतुर्णाम्) **[4×1=4]**

क) मात्ता सह पिता प्रयागराज तीर्थं गतवान् ।

ख) कृष्णः मातुः निलीयते ।

ग) पुस्तकस्य कृते बालकः प्रयासं करोति ।

घ) गृहिनी गृहकर्मणि संलग्ना अस्ति ।

ङ) विद्यालयं निकषा एव मम गृहमस्ति ।

च) हरिः धर्मसरवं प्रति न पश्यति ।

**17)** निम्नलिखितेषु कमपि विषयं स्वीकृत्य 50 - 60 शब्देषु संस्कृतभाषायां निबन्धं लिखत – **[5]**

क) राजस्थानम्

ख) प्रियः शिक्षकः

ग) सदाचारः

**18)** अधोलिखित वाक्यानां संस्कृतभाषायाम् अनुवादः करणीयः। (केषाञ्चित् पञ्चानाम्) **[5 × 1 = 5]**

क) धनपति सेवक के साथ गया ।

ख) मुझे आप अच्छे लगते हो ।

ग) मनीष अपने पिता से डरता हैं ।

घ) गुरू के प्रति मेरी श्रद्धा है ।

ङ) तुम और हम प्रतिदिन खेलेंगे ।

च) नदियाँ समुद्र की ओर जावें ।

छ) तुम भी रात दिन पढ़ो ।

ज) दम्पती माता – पिता की सेवा करते हैं ।

◆ ◆ ◆

DO NOT WRITE ANYTHING HERE